द्धये स्नानमुच्यते शंकुनास्त्राभिमंत्रेण शुचिस्थानात्तु मृत्तिका गृहीत्वास्त्रेण संसिच्य यायाज्जलनिकेतनं त
त्रादौ जलकूलं तत्तालयेदस्त्रवारिणा मृदं कृत्वा त्रिनवपकभागाप गंतत निधाय गोमयं दर्भान्तिलान्स्वा
न्नाभिमंत्रितान् मृत्तिका मया भुञ्चकद्यातं स्नानमाचरेत् बहिरुद्भूततोयेन मलस्नानं ततः परं विधा

यवैदिकं स्नानं तद्गं तर्पणं तथा ततस्तांत्रिकस्नानस्य विधिरत्नेन मृत्तिकां समादायास्त्रमंत्रेण मंत्रयित्वा स्वदि
दिक्षु शिवामंत्रेणापह्नुत्य त्रिर्मूलेनाभिमंत्रयेत् मूर्ध्नादिपादपर्यंतं विलिप्य प्रणम्य जले आधारः सर्वभूत
स्य विस्तारः तल्लनेजसः तद्रूपाश्च तेजानानास्नाश्चापः प्रणमाम्यहं संमुखीकरणीमुद्रां बद्ध्वा प्राणांस्त्रि
रुध्याच निमज्ज्य तस्मिन्मुत्थायनाभिमात्रेजले स्थितः तांत्रिकस्नानसंकल्पमासोत्रखादिरर्घकं कृत्वा
यमूलमंत्रेण प्राणायामत्रयं चरेत् विन्यस्य च षडंगानि कल्पयेत्तीर्थमग्रतः चतुरस्रं हस्तमात्रेण जले
परिकल्पिते ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे तेन सत्येन देवेश तीर्थं देहि दिवाकर इति सूर्यं
प्रार्थयित्वा क्रोमिति अंकुशमुद्रया मितार्कमण्डलात्तस्मात्तीर्थान्यावाहयेदिह गंगे च यमुने चैव गोदावरि स
रस्वती नर्मदे सिंधुकावेरि जलेऽस्मिन्संनिधिं कुरु एवमुक्त्वा तु तीर्थानि तस्मिंस्तोये नियोजयेत् मूलमं
त्रेण च तीर्थशक्तिं तत्र समाकर्षयेत् अर्कस्य मंडलं ध्यात्वा तन्मंत्रेण च पूजयेत् सर्वानंदमयीमशेष
दुरितनिध्वंसां स्वंगां कम्रांभा[illegible]म्बुजां मृदंकरद्वयेन दधतीं पाशं स्तनीं वामतः अन्तःसुधामृतपूर्णहेमकल
शाम्भुक्तात्ममालावरां गंगासिंधुसरिद्वरादिसहितां श्रीतीर्थशक्तिं भजे क्रां क्रीं क्रूं क्रैं क्रौं फः इति सर्वानं
दमयदां तीर्थशक्तिं तथा हि लिपुगलेव क्रिंगेहिनी एकविंशाक्षरः प्रोक्तस्तीर्थशक्तेर्महामनुः तज्जलेन

मे.
ते.
५.

गमंत्रेणमंत्रयेद्दशवारकं तारोनमोभगवतीब्रूयाद्वंततोम्बिके अंबालिकेमहामालिन्येयेहि भगवत्यप
अशेषतीर्थालवालेमायाश्रीबीजमुच्चरेत् शिवजटाविनिःसृते च गंगेगंगाम्बिके हि ठः गंगाविद्ययमाख्या
तात्रिपंचाशद्भिरक्षरैः भुवनेश्वर्यासमालोक्यामृतीकृत्य सहधामुना कवचेनावगुण्ठ्याथ सलिलान्मंत्र
णमंत्रवित् मूलेनदेवतांतत्रसांगांसावरणांतथा समावाह्यजलेध्यात्वातत्पादहृदयनिर्गतं ध्यात्वातीर्थंस
र्म्मूलेमंत्रस्नायांजलेत्रिशः हृदिदेवंस्मरन्मज्जात्सिंचेत्कुंभमुद्रया त्रिभिःश्लोकैर्मूलमंत्रतारवंवीजपूर्व
कैः सिसृक्षोर्निखिलंविश्वंमुहुःशुक्रंप्रजायते मातरः सर्वभूतानामापोदेव्यःपुनंतुमां अलक्ष्मीमलरू
पायाः सर्वभूतेषुसंस्थिताः क्षालयंतुनिजस्पर्शादापोदेव्यःपुनंतुमां यन्मकेशेषुदौर्भाग्यंसीमंतेयच्चमू
र्द्धनि ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुवोनमः नमः स्वाहान्तमूलेनत्रिराचमनमाचरेत् त्रिधादेवंचसं
तर्प्यतोयमध्यात्तदेवजेत् पीतवस्त्रयुगंधृत्वाभस्मोल्लासात्कृतौतथा मृदाह्निस्तत्स्थाचामेद्देवस्नानवि
धिंस्मृतः मंत्रस्नानप्रकर्त्तव्यंशीतयोर्देशकालयोः तोयाभावेवातेदुर्गेकायस्वास्थ्यवर्धके प्रद्याल्पपा
दाचाचम्यप्राहृतेननलवारिणा स्थानंदशदिशःप्राग्वत्संशोध्योपविशेत्ततः जलंहस्तितलेन्यस्यकुमाद्यासा
लतश्चरेत् मातृकादीस्तथामूलमंत्रेण्यासानशेषतः न्यासान्तेसंस्पृशेत्तोयमंत्रस्नानमिदंवरं केवलादुद

४०

कस्नानात्संस्कारपरिवर्जितात् प्रभासादिषु तीर्थेषु यत्फलं स्नानकस्य तु ज्ञेयं दशगुणं तस्मान्मंत्रस्नानपरिचर्या
त् ध्यानस्नानमथो वक्ष्ये ह्याभ्यामपि परं च यत् स्वस्थितं पुण्डरीकाद्यं मंत्रमूर्ध्नि प्रभं स्मरेत् तत्पादोदकजां धारां
निपतंतीं स्वमूर्द्धनि चिंतयेत्सुषुम्नारंध्रेण प्रविशंतीं स्वकां तनुं तस्मात्संक्षालयेत्सर्वमेतद्देहगतं मलं तत्
क्षणाद्विरजो मंत्री जायते स्फटिकोपमः इदं स्नानवरं मंत्रस्नानोच्छ्रितगुणं मतं मनसा यस्तु संशुद्धः स
शुद्धः सर्वकर्मसु अथ मानसिकं स्नानं मनसा मूलमंत्रतः प्राणानायम्य ऊर्ध्वीतं दृष्ट्वा तीर्थेषु भावतः
यद्वा शिवात्मकैर्मंत्रैः कृत्वा तीर्थं शिवात्मकं मार्जनं संहितामंत्रैः शिवस्नानमितीरितं स्नानपूर्वाः क्रियाः
सर्वाः प्रशस्ताः सिद्धिं प्रयांति च तस्मात्स्नानं पुरा कुर्यात् देवेकं देहशक्तितः ततस्तु तिलकं कुर्याज्जातेर्वा दे
वतस्य च यथाक्रमफलं तीर्थं सर्वज्ञिर्वा भक्तिभावतः ब्राह्मणस्योर्ध्वपुण्ड्रं स्यात् क्षत्रियस्य त्रिपुण्ड्रकं अर्द्ध
चंद्रं तु वैश्यस्य शूद्राणां वर्तुलाकृतिं ऊर्ध्वपुण्ड्रं मृदा कुर्यात् त्रिपुण्ड्रं चापि भस्मना केशरेण च कस्तूर्या श्री
खंडेन यथारुचिः वैष्णवस्योर्ध्वपुण्ड्रं स्यात् त्रिपुण्ड्रं शिवसेविनः अर्द्धचंद्रो गणेशस्य देवीभक्तस्य वर्तुलं
नारायणपरो यस्तु चंदनस्य तु मूलकं भाले विभूतिं वंद्यो सौ ब्रह्मविष्णुशिवात्मकं भूतिदानाद्विभूतिः स्या
द्विधिना विहिता यदि यथा कथं विविधिप्रता भस्म साकं कृतं न जंनं शिवाग्नेर्भस्म संग्राह्यं सर्वमग्निषोमोद्भवं तु वा वै

मे॰ तं॰ ५१

वाहेयग्नुत्रुवंवापिपक्वंम्नुविहगंपिच कपिलायाःशकृत्कृत्संगृहीतंगगनेपतत् नक्लिन्नंनापिकठिनंनदुर्गंधिनचोषि
तं उपर्यधःपरित्यज्यगृह्णीयात्पतितंयदि पिण्डीकृत्यशिवाग्नौतत्क्षिपेन्मूलमंत्रतः अपक्वमपिपक्वंचसंत्यज्यम
ध्यस्थितं आदायवाससालोड्य भस्माधारेविनिःक्षिपेत् भस्मसंग्रहणंकुर्यात्देवेनत्वासितेसति उद्वासनेकृतेय
स्माच्चण्डभस्मप्रजायते यद्वाद्विजातिस्तत्कुर्यात्सद्यमानीयगोमयं वामेनपात्रसंयोज्याघोरमंत्रेणनिर्दहेत् पुरु
षेणसमुद्धृत्यईशानेनविशोधयेत् इत्थंतुसंस्कृतंभस्मअग्निरित्यादिमंत्रतः तद्द्रव्यायेतियजुषामंत्रयेद्रक्षेत
त्तया प्रणवाद्यैस्तुवर्णैर्हृदंतैर्नामभिःशुभैः पंचवर्णायस्त्वेराद्यैर्भालांशोदरहृत्सुच त्रिपुंड्रधारणंकुर्यान्मू
र्ध्निपंचाक्षरेणच एभिस्तुनामभिर्धार्यंत्रिपुंड्रंभस्मद्विजादिभिः ब्रह्मालालाटेविन्तेयोहृदयेहव्यवाहनः नाभौस्कंदो
गलेस्थाणुर्रुद्रोदक्षिणबाहुके आदित्योबाहुमध्येचशशीचमणिबंधके वामेवामबाहौबाहुमध्येप्रभंजनः
मणिबंधेचवसवःपृष्ठदेशेहरिस्मृतः शंभुःककुदिप्रोक्तः परमात्माशिरस्मृतः कस्तूर्यादिकसंयुक्तंभस्म
प्राज्ञस्तुधारयेत् अद्विजैर्मूलमंत्रेणशिवपंचाक्षरेणवा त्रिपुंड्रंकारयेद्भालेब्रह्मविष्णुशिवात्मकं मध्यांगुलि
भिरादायतिसृभिर्मूलमंत्रितं अनामामध्यमांगुष्ठैरथवासम्यक्त्रिपुंड्रकं वर्तेयथैतांविकीर्णमध्यांमूलेनाचमनस्य
यं सित्वांवधाचमूलेनप्राणायामत्रयंचरेत् अंगानिविन्यसेद्देहेकरंन्यासपुरःसरं अमृतीकृत्यपुरतोजलंवंये

५१

मुद्रया अभिमंत्रयन्मूलेन सप्तवारं ततः परं अकारादिक्षकारान्तैर्मातृकार्णैः सबिंदुभिः प्रत्यर्णं प्रोक्षयेन्मूर्ध्नि कु
शैर्मूलेन च त्रिधा देवं ध्यात्वा च मनुविज्ञानमण्डलसंस्थितं आदाय तोयमामंत्र अब्बीजैर्भूतात्मकैस्तथा लं वं रं
यं हं इति चतात्मकैः सप्तधा जलं मंत्रयित्वा पुनः सप्तवारं मूलेन मंत्रयेत् तज्जलं वामहस्तेन धार्य्यतस्तत विं
दुभिः दक्षहस्तेन सप्तांशकं पठं मूलमंत्रकं हस्तमुन्नासतो वामात्तु वारिसेचनमाचरेत् नासामार्गप्रविष्ट
शिष्टेन तेजोरूपेण तेन तु प्रविश्यान्तर्गतं सर्वमलं संशोध्य निर्गतं दक्षिणनासापुटेनैव तत्सृत्वा दक्षिण
हस्तगं वामभागे वज्रशिलां ध्यात्वा सत्रेण चैव तं क्षिपेत् अथाल्पहस्तावाचमम् मूलमंत्रेण मंत्रवित् गायत्र्या
चाष्यमूलेन दद्यादर्घ्यत्रयं ततः रविमण्डलसंस्थाय स्वेष्टदेवाय तर्पयेत् जलेन मूलमंत्रान्ते स्वमुकं तर्प
यामि च उक्त्वा त्रिधा तर्पणीयं वामकैः कारणेन तु इष्टदेवस्य गायत्रीमष्टाविंशति संख्यका जपेदभावे
ब्रालीं तु वैदिकं मतमाश्रितः तांत्रिक शिवगायत्रीयं ये तस्या निशेष्यते ॐ तत्महेशाय विद्महे वाग्विशुद्धा
य धीमहि तन्नः शिव प्रचोदयात् मूलमष्टानशतं जपित्वा चार्पयेदेवस्तत्वान्ते इष्टदेवतां सूर्यमंडलतो
देवं विम्ब हृदये स्वके ततो गुरुं च प्रणमेदिति संध्यान्ततो त्रिकी त्रिकालसेवाकर्तव्या संध्यालोपात्फलेन
हि देवतो यदि लोपश्चेत्तदा मूलं शतं जपेत् प्रायश्चित्तार्थं तां कृत्वा कुर्वीत सप्तम्याग तो वैदिकं तर्पणं कृत्वा

मे॰ ततस्तांत्रिकमारभेत् प्राणायामत्रयं कृत्वा मूलेन न्यासमाचरेत् ऋष्यादित्रितयः स्यात्तु ततोथ तन्मुद्रया वं
तं॰ जपत्वामृतीकृत्य जलं तत्र सचक्रके सांगावरणके देवं ध्यात्वा मूलं समुच्चरेत् अमुकं तर्पयामीति प्रोक्त्वा चा
४२ ष्टोत्तरशतं तत्तदर्द्धमथवा विंशदष्टयुक्तं मनुवो ज्ञके देवस्यामृततुध्यानतीर्थतोयैः प्रतर्पयेत् तदावर
णदेवांश्च तत्तद्देकैकवारकं संतर्प्य देवं स्वहृदि तीर्थस्तूर्ध्वे विसर्जयेत् गृहं दिगीशाश्च त्वगात्वा भाण्डक
रेदथ तु जलपूर्णं व्रजेन्मौनी स्वेष्टदेवं हृदि स्मरन् एकान्ते निर्जने यायात् मनोज्ञे दोषवर्जिते दिगंतरं न वीक्षेत
यावत्प्राप्नोति वेश्म हि प्रदक्षिणं यजन् वा फं कृत्वा पादौ च हस्तकौ प्रक्षाल्याचम्य पूजाया गृहद्वारान्तरे स्थितः
गेहे च द्वारदेशस्थः प्रणम्य मनसा गुरुं प्रणमेदिष्टदेवं स्वदिक्पालानपि चेतसा यत्सर्वमर्जितं पापं तद्दिने स
दिनेपि वा तस्य पापस्यापनोदार्थं मंत्रद्वयमुदीरयेत् हे देव प्राकृतं चित्तं पापाक्रान्तमिदं मनः तन्निःसारय चि
त्तान्मे पापं फट् फट् च तेन नमः सूर्यः सोमो यमः कालो महाभूतानि पंच च एते शुभाशुभस्येह कर्मणो न
व साक्षिणः हुंफडिंति च द्वयं वक्त्रोथ दृष्टाः पृष्ठे च पार्श्वयोः एवं कृते प्रथमतः पापोत्सादनकर्मणि यत्स्याद्
ष्टं तरं पापं तद्दूरे चावतिष्ठते अतीते पूजने स्याने स्वप्रयाते पुनश्च तत् यत्स्यादत्यन्तरं पापं तन्नाशमुपग
च्छति पूजने तत्कृतपापस्य काममिष्टंदनाद्भवेत् ततः प्रक्षाल्य पादौ च हस्तौ वाचम्य यत्नतः दद्याद्वर्द्धि दिनेशा

यतस्त्वकारइहोच्यते गोमयेणोपलिप्तायांभूमौकृत्वातुमण्डलं सिंदूरेणततःपश्चादुपविश्यनिजासने प्राङ्मु
खःप्रणमेदिष्टदेवतांभक्तितत्परः प्राणायामत्रयंकृत्वासूर्य्यमंत्रेणमंत्रवित् ह्रौंह्रौंसः इतिसूर्य्यस्यप्रोक्त
रोमंत्रउच्यते विन्यस्यचतथैवहृदादीन्ध्यात्वासूर्य्यमनन्यधीः पद्मद्वयाभयवरान्दधतंकराब्जैर्माणिक्यमौलि
मरुणांगरुचिंत्रिनेत्रं रक्तांबुजासनमशेषगुणैकसिंधुं भानुंसमस्तजगतामधिपंभजामि ततकल्पोक्त
विधानेनपूजयेदुपचारकैः पुरतोमण्डलंकृत्वाजलेनचतुरस्रकं निधायतत्रसाधारंसजलंताम्रपात्रकं
गंधपुष्पाक्षतान्दर्भान्दूर्वाःसर्षपसंयुताः सतिलान्करपुष्पाणिजवांश्चापिप्रविन्यसेत् सूर्यमंत्रेणतत्पात्रं
स्पृशन्वक्षेणतंरशान्त अभिमंत्र्यचपात्रंसमुत्थायकरद्वयात् मूर्द्धान्तंसूर्य्यमंत्रेणदद्यादर्घ्यंविचक्षणः ह्रौं
ह्रौंसःसहस्रांशिनतवपदमस्तुवेत् ततश्चयोगकरणपहूनामसनेतिच संस्थितश्रीसूर्य्यायेषतेर्घ्यः स्वाहामनुः
स्मृतः चतुस्त्रिंशदक्षरोयंसूर्य्यार्घ्यमंत्रमनन्यधीः तदर्घ्यमनुस्मृतंतस्यध्यायेद्दैपाकसत्तमः स्वगात्रप्राणम
विसृजेन्मण्डलान्तेदिवाकरं ततउत्थायविधिवद्द्वारपूजांसमाचरेत् द्वारमध्येतुनाथाद्यंपतनम्मध्येविघ्नप
जजेत् तदक्षिणेमहालक्ष्मीवामेचापिसरस्वती द्वारश्रियंचतन्मध्येशाखयोर्देहलिनाम्नयोः ऊर्ध्वभागो
त्तरंयावत्तंचपंचविभागके नामस्याद्यदंरविंदुयुक्तंनामचदंतक सम्बर्घ्यंपूदंतंचदेवानेतान्प्रपूजयेत् ॥

ह्र

मे० तं० ५२

गणपतिं द्वारपालं ततश्च वस्तथास्या शुक्रं शङ्खनिधिं दक्षे वामे वसुमतीयुतं शङ्खनिधिं पद्मनिधिं नदयोर्दक्षवाम
तः मायाशक्तिं च विघ्नशक्तिं गङ्गां च यमुनां तथा धातारं च विधातारं देहल्यां नमस्तथः आदौ तु पश्चिमद्वारस्
ज्ञाचयप्रकाशिता नन्दीं चापि महाकालो द्वारयोर्दक्षवामयोः संस्थितावेवं मदग्द्वारं आग्नेय्यां च प्रपूजयेत् द्वा
रपालो क्रमात्तेषु गणेशवृषभावपि भृङ्गिरीटिस्तथा स्कन्दउमा च चण्डेश्वरो तथा विस्तर्नन्दः सुनन्दश्च च
ण्डश्चापि प्रचण्डकः बलश्च प्रबलश्चैव भद्रश्चापि सुभद्रकः वक्रतुण्डैकदंष्ट्रौ च महोदरगजाननौ लम्बोद
रश्च विकटो गणेशद्वारपालकाः विघ्नराजो धूम्रवर्णः क्रमात्पश्चिमद्वारतः देवाः सूर्यस्य योमित्योष्टावे
ताः द्वारपालकाः ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही च तथैन्द्री च चामुण्डा च श्रियाः सह श्र
थवद्ध्येहारदेवध्यानं मेत्रेषु गोपितं देवं द्वारे द्वारदेवाः स्वं द्वाटयन्ति यत् पाशाङ्कुशफलाम्भोजपाणिं पातु लम्बो
न्दिलं वीरं विघ्नेश्वरं वन्दे गजवक्त्रं त्रिलोचनं पद्महयवराभीतिलसत्पाणिं चतुष्टया निर्दग्धहेमगौराङ्गी महा
लक्ष्मी त्रिलोचना शशाङ्ककृतपुस्तकाभीतिवरहस्ता त्रिलोचनं श्वेतपद्मासनी शुक्लाम्बरवस्त्रा सरस्वती न
मकार्णस्वराभासादिव्यरत्नविभूषिता द्वारश्रीरुद्धपद्मस्था वराभयकराम्बुजा सितो गजास्यः परम्भुदण्डपा
शत्रिशूलकं भजेश्चतुर्भिर्विभ्राणो मूषकोपरि संस्थितः कपालं शूलविभ्राणं कपालं कमलं विग्रहं सदेवी दुर्गा

५३

पम

५२

भवायामितेदेवेसद्देनविद्विषं वरदधारंदद्भजेनालिंगनंतसहस्रसुखिलं वामेशंखधरंमुकानिर्भशंखनिधिंभ
जे आलिंगनंतवक्षेमतिंललाटेपद्मचिह्नितं पद्मनिधिंमणिनिभंवामेणेगत्सलधारिणं वरांकुशाभीतिपा
शहस्तांसंसारमंडलिकां त्रिनेत्रांश्यामवर्णांतांश्यामांमायामहंभजे पाशांकुशवराभीतिहस्तानामरुणः
प्रभां त्रिनेत्रांचिन्कलांवंदेगौरींवरोज्वलां वराभयकरींसौम्यांसोमकोटिसमप्रभां भजेगंगांमहादे
वीपरांदेवतरंगिणीं वराभयकरांवंदेकालिंदींकालविग्रहां कूर्मकच्छपमारूढांकंठेनीलोत्पलस्रजां
कनीरंजगतांवंदेशंखचक्रगदाभुजं विष्णुंगरुडआरूढंपातांरक्तमविग्रहं रक्तरक्तारविंदस्थंवराभयक
मंडलं हंसारूढंविधातारं वंदेसमसमन्वितं सिंहारूढांश्यामवर्णांखड्गखेटकधारिणीं अथस्यांदेहलिं
वंदेपश्चिमास्यांस्वदक्षिणीं पश्चिमद्वारमासाद्यनामलत्रितयपूर्वकं द्वारस्थद्वारायचास्त्रेणमंत्रितान्सर्षपादतान्
पुष्पयुक्तांस्तुविकिरेन्मण्डपाभ्यन्तरेबुधः नाराचमुद्रयासम्यगस्त्रमंत्रेणदेशिकः अपक्रामंतुभूतानि
पिशाचाःप्रेतगुह्यकाः येचात्रनिवसंत्यन्येदेवताभुविसंस्थिताः अपसर्पन्तुतेभूतायेभूताभुविसंस्थिताः
येभूताःविघ्नकर्तारस्तेनश्यन्तुशिवाज्ञया क्रोधेकयारेततमस्त्रांस्त्रपर्वनाराचमुद्रया दिक्षुतांतान्मण्डपस्यान्त
स्ततोविघ्नोत्थनिर्गतान् स्ववामांगस्यसंकोचान्मार्गदत्त्वापसारयेत् अस्त्रमंत्रेणसम्यक्त्वामपासिंवानत्रयेनच

मे॰ तं॰ ४८

भौमानुत्सादयेन्नालत्रितयेनान्तरिक्षगान् तिर्यग्दृष्ट्यावलोकेन दिव्यान्विघ्नान्निवारयेत् दक्षपादं पुरस्कृत्य प्रविशेद्देव
मंदिरे शाक्तस्तु वामपादेन द्वारमाच्छाद्य वाससा पंचगव्याञ्चितोयाभ्यां प्रोक्षयेन्मण्डपान्तरे संमार्जनोपलेपाद्यै
र्दर्पणोदरवत्कृतं विमलं धूपदीपादिपुष्पदामादिशोभितं पंचवर्णरजश्चित्रं स्थानशुद्धिरियं मता नैरृत्याम्
म्बुधेः वास्तुपुरुषं चंदनादिभिः तत्रैव वास्तुनाथाय ब्रह्मणे नम इत्यपि रक्तवर्णं रक्तवर्णं शक्तिहादशसंयुतं
पूजयित्वादीपनाथं भैरवं प्रार्थयेद्धिदि अतितीक्ष्ण महाकाय कल्पान्तदहनोपम भैरवाय नमस्तुभ्यम् अनुज्ञा
दातुमर्हसि अः फडिति च मंत्रेण पूजावेदीं ततो विशेत् संस्कुर्यादासनस्थानं च ताभिर्वीक्षणादिभिः संस्कारेत
त्रसंभुज्यावेद्यान्ताः पीठदेवताः आधारशक्तिमारभ्य स्वासनं तत्र विन्यसेत् पूजासनमथात्मीयं चैलाजिनकुशो
त्तरं तत्रोपविश्य विधिवत् स्मरेद्विष्णुं गुरुं मुदा मेरुपृष्ठ ऋषिः प्रोक्तः सुतलं छंद ईरितं पृथिवी देवता प्रोक्ता
विनियोगो निजासने पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं च धारय मां देवि पवित्रं कुरु चासनं आस
नस्य चान्तः कोणे गणेशं च सरस्वतीं दुर्गां क्षेत्रपतिं चापि वह्न्यादिषु समर्चयेत् उदङ्मुखः प्राङ्मुखो वा स्वस्ति
कासनमास्थितः पद्मासनगतो वापि ऋजुकायो मनः स्थिरः स्थापयेद्दक्षिणे भागे पूजाद्रव्याणि चात्मनः
सुवासितांबुसंपूर्णं [illegible] कलशं शोभनं प्रक्षालनार्थं करयोः पात्रं पृष्ठे निवेशयेत् घृतादिज्वलितान्दीपान्

स्थापयेत्परितः सुभान् दर्पणं चामरं छत्रं तालवृन्तं च पादुके यथायथं च संस्थाप्य संकल्पितानि चात्मवान्
पुष्पैर्नैवेद्यगंधादीन् ह्रीं ऊं फडिति मंत्रतः नमाचमनद्रव्याद्रव्याणि समर्पयाच विलोकयेत् दृष्ट्वा चात्मविज्ञाने
सम्यक् पुष्पादिहरणेन अस्पृश्यस्पर्शनेन वापि यदन्यायानि तेन वा तथा निर्माल्यसंस्पृष्टकीटाद्यारोहणेन च य
त् तत्सर्वं नाशमायाति नैवेद्याद्यवलोकनात् ततो रमिति मंत्रेण शिखादीपसंस्पर्शनात् सततस्याहुभ
दोद्दीपोत्थितः क्रव्यादः सुखप्रदः ॥ मक्षिकाकीटकेशादिदोषात् क्रव्यादिसंहतेः वसामज्जादिसंभूतेः घृताद्यै
रुपयोजितं अज्ञानतः पतत्सर्वं दोषस्पर्शाद्धि नश्यति सौं बीजमनुं च स्मरन्मंत्री देवतीर्थेन संस्पर्शनात् पानीयं च
रमध्यस्थं दृष्ट्वा सम्यक् च साधकः वामेन पाणिना धृत्वा वामपार्श्वस्थितं च तत् पात्राधारे एवं मंत्रेण संस्कुर्वन्संस्प
र्शनाज्जले स्वसंतापयन्त रविंड वेजाह्निपरियोजितं तत्पाचनामह्यं तं च बहूदन्तः प्राग्वमंत्रकः यदन्नानादमेध्या
दिसंसृष्टिरिह संगता यदन्नाद्रवत्वेन पात्रेतोयेवान्नानतो भवेत् जलाशयशवस्पर्शाजलस्यानाद्य संगतं इ
त्यादिदूषणं नश्येन्नित्ये देवपूजने ततः कृतांजलिः शिष्टो वामदक्षिणपार्श्वयोः गुरुं गणपतिं नत्वा पुरतः
स्वेष्टदेवतां सुगंधपुष्पाण्यादाय चंदनाक्तानि मंत्रवित् फ्रौं मंत्रेण करयोः तत्त्वमंत्रेण मर्दयेत् तत्पुष्पं वा
मकरेतेन समादाय च मस्तके भ्रामयेत्परितस्तारं जपन् घ्राणायतनमनः ह्रौं क्लौं शर्वं पठेत् श्लोकमिमं सचानिगद्य

ने° ते° ५८

ते समस्तं विलयं यान्ति येन माहेश्वरि त्वन्तु यता मन्त्रो रोगभयं क्लेशाः पतन्ति रिपुमस्तके अस्त्रमन्त्रेण नाराचमुद्रयेश
दिशि न्यजेत् करस्थं हृदि तन्तोस्त्रेण कुर्यान्मालाञ्च येन तनः अर्धो हुं मन्त्रमन्त्रेण दिग्बन्धमपि तेन च तेन संजनितं
तेजो वह्निप्राकारं मुद्रया रक्तदाम्नाग्निमण्डलेन प्राणायामत्रयं चरेत् अन्तर्हृदि तत्कुर्यान्नमस्कारमथ स्वयं वे
पादतो जानुपर्यन्तं चतुरस्रं सवज्रकं लंयुतं पीतवर्णं च भूस्थानं ब्रह्मदेवतं अधिष्ठितं निवृत्त्याख्यकलयास्था
नमुच्यते उत्पन्नं स्तम्भी वा नामेवं रूपं विचिन्तयेत् जान्वोर्नाभिपर्यन्तं वृत्तं रक्तं सवज्रकं लंयुतं पीतव
र्णं च भूस्थानं ब्रह्मदेवतं अधिष्ठितं निवृत्त्याख्यकलयास्थानमुच्यते उत्पन्नं स्तम्भी वा नामेवं) मध्यं स्थान
सितप्रभं अर्धचन्द्रनिभं पद्मगद्वयं तन्मध्यलाञ्छितं षड्कोणं विन्दुभिः षड्भिर्युक्तं वं बीजसंयुतं प्रतिष्ठाकलयायु
क्तं ध्यायेन्नाभिस्थदैवतं नाभ्यादिकण्ठपर्यन्तं मारकं रुद्रदेवतं रं बीजयुक्तं कलयायुतं विद्याख्यया तथा दी
प्तिमत्त्वाग्निकोपेतं त्रिकोणाकारतां गतं महाप्रलयसंस्थानं वह्नितत्त्वं विचिन्तयेत् कण्ठाद्भ्रूमध्यपर्य
न्तं मारकं रुद्रदैवतं रं बीजयुक्तं कलयायुतं विद्याख्यया तथा दीप्तिमत्त्वाग्निकोपेतं त्रिकोणाकारतां गतं
महाप्रलयसंस्थानं वह्नितत्त्वं विचिन्तयेत्) षट्कोणाकारतां गतं षड्बिन्दुलाञ्छितं समं वेष्टितं कृष्णवर्णकं
वायुस्थानं शान्तिकलाधिष्ठितं शिवदैवतं यं बीजयुक्तं सर्वेषां प्राणरूपं विचिन्तयेत् भ्रूमध्याद्ब्रह्मरन्ध्रान्तमा

काशस्थानमच्युते वृत्ताकारं धूम्रवर्णं महोच्चध्वजलांछितं शान्त्यतीतात्मकलया पिहितं शिवदैवतं
हंबीजयुक्तं ध्यात्वा स्वदेहे भूतानि विन्यसेत् थमेकं दशमद्भूतं ज्ञाननालसुशोभितं कृत्वा तत्कोऽर्ध्वं
कोलस्थं प्रदीपकलिकानिभं सुषुम्नावर्त्मना जीवं परमात्मनि योजयेत् योगयुक्तेन विधिना सोऽहंमं
त्रेण साधकः तत्रैव सर्वभूतानि विलीनानि विचिन्तयेत् शरीरे वामकुक्षौ तु चिन्तयेत्पापपूरुषं
वामकुक्षिस्थितं पापपुरुषं कज्जलप्रभं ब्रह्महत्याशिरःस्कंधं स्वर्णस्तेयभुजद्वयं सुरापानहृदायुक्तं
गुरुतल्पकटिद्वयं तत्संसर्गपदद्वंद्वमंगप्रत्यंगपातकं उपपातकरोमाणं रक्तश्मश्रुविलोचनं खड्गच
र्मधरं क्रूरं रुष्टं पापं विचिंतयेत् तथा संशोषयेद्देहं शरंकादिक्रमेण वै विधाय प्राणसंरोधं वायुबी
जेन वायुना वह्निबीजेन तेनैव प्लावयेत्सकलां तनुं संजाते सकले देहे देवतोपासनक्षम आत्मली
नानि तत्त्वानि स्वस्थाने स्थापयेत्ततः आत्मानं हृदयांभोजमानयेत्परमात्मनः हंसमंत्रेण विधिवः ते
जोरूपं कलेवरं देवताराधने योग्यमस्त्वत्रमिति भावयेत् भूतशुद्धिविहीनेन कृता पूजाभिचारवत्
विपरीतफलं दद्यादभक्त्या पूजने यथा भूतशुद्धिं विधायैवं प्राणस्थापनमाचरेत् प्राणप्रतिष्ठामंत्र
मनयोजेशयप्रजाः छंदो ऋग्यजुःसामप्राणशक्तिस्तु देवता ऋषिः शिरसि वेदच्छंदांसि हृदि

से॰ नं॰ ४९

देवता आंबीजाय नमो गुह्ये पदे क्लीं शक्तये नमः नाभौ नमः क्रों कीलकाय नियोगो हृत्स्थिता वति ॐ आं ह्रीं
क्रों कवर्गसानुस्वारं नमो मुखे पंचतत्वसमन्वितार्थ्यात्मने आं हृदि न्यसेत् ॐ आं ह्रीं क्रों ईं चवर्गेन हृद्धस्तादि
पंचकं आत्मने ईसमन्वितार्थ्य शिरसे वह्निगेहिनी तानि बीजानि उं तादृक् टवर्ग आ च कादि च प्रोक्तानि तदात्म
ने ऊं च शिखायै च वषड्वदेत् तानि बीजानि पंते च वाग्वादिनि तदात्मने ऐं मन्त्राः कवचाय तिहूं वदेत्तद
नन्तरं चतुर्बीजं च श्रौं क्रें डौं पवर्गं च तादृशं वचनादि च तद्वदस्मात् औं नेत्राय वौषट् तथा चतुर्बीजं च
अं तादृक् यवर्गमनु आदि च तदात्मने स्वरः अस्त्राय फडिति संवदेत् अंगुष्ठादौ हस्ततलान्तं न्यसेदे
वमेव हि नाभ्यधः आपिकण्ठं योमद्धोयोध्यतद्दन्तकं आं ह्रीं क्रों क्रमतो न्यस्य हृन्न्यासाष्टदलेषु च प्र
वेतः क्रमतो वर्णान् कर्णिकायां हृदन्तकान् लं रं हं षं पं चं पं च सं शं तं इति वर्गतः दिक्षु न्यसेन्मतो ध्या
येत्प्राणशक्तिं हृदि स्थितां रक्ताब्धिपोतारुणपद्मसंस्थां पाशांकुशौ विद्रुतशरासवाणान् शूलं कपा
लं दधतीं करांब्जैः रक्तां त्रिनेत्रां प्रणमामि देवीं हस्तेति थाय हृदये प्राग्बीजयादिकं षट्कं हंसः सोऽहं
मम प्राणा वदेदिह स्थिता इति प्रोक्तान्यैव च पुनर्मम जीव इह स्थितः पुनस्तद्वत्क्रमान्मम नववदे त्सर्वेन्द्रि
याणि च पुनस्तद्वत्क्रमान्मम नवाप्लुतस्थलतरुत्वरेत् श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तनः तिष्ठन्तु

वह्निजायान्तमुच्चार्य तारं ततो जपेत् वक्षोर्मिनिर्मितं ध्यायेद्योगिनिस्यात्प्राणसंस्थितिः प्राणायामत्रयं कृत्वा
मातृकान्याससमाचरेत् प्राणायामस्त्रिधाप्रोक्तास्तत्र वैदिकयौगिकाः मंत्रसिद्धिः पापनाशो योगसिद्धिः फ
लक्रमात् मातृकाख्येस्त्र मंत्राख्ये स्त्रात्रिके द्विविधो मतः मातृकाख्यो जपस्यादौ जपान्ते च कृतो यदि वर्ण
गणस्यादिदोषानशेषान्हंति तत्क्षणात् वामया पूरयेद्वायुं स्वरैः कादैस्तु कुंभके रेचयेद्यादिभिर्दक्षनासया मा
तृकादिभिः यावत्कंकानियम्यासुमनसैवमनुं जपेत् कनिष्ठानामिकांगुष्ठैर्नासां धृत्वा तु मांत्रिकः प्राणा
यामस्त्वयं प्रोक्तो यदन्यमनसा कृतं जपध्यानादिकं तस्य दोषमेष व्यपोहति गायत्रीं शिरसा सार्द्धं सप्तव्याहृ
तिपूर्विकां प्रतिप्रणवसंयुक्तां त्रिरयं वैदिको मतः मध्यमांगुल्याद्यावदयमंगुष्ठेन निपीड्यते मात्रासा पोच्यते स
द्भिः योगेऽभीष्टप्रयच्छति मायत्रीशिरसासार्द्धंसप्तव्याहृ जानुं प्रदक्षिणीकृत्य याथावत्कालेन हस्तकः तावत्का
लमिता मात्रा स्मृतिः श्वासस्समापि च जघन्यो रविमात्रः स्याज्जीनमात्रस्तु मध्यमः श्रेष्ठः षड्विंशमात्रोयं योगतंत्रय
स्तुसाधकः केवलकुंभके सिद्धे सिद्धिः स्याद्राजयोगजा वीर्यस्तंभश्च बकायुर्वलिपलितनाशनं पूरके कुं
भके सिद्धे क्रियायोगस्य सिद्धयः श्रीवीलंबनशीतोस्मवाधातदृष्टदृष्टमवापि च पूरकः कुंभको रेको यदान्त
लः प्रजायते हठयोगस्य तदा सिद्धाद्यनिमाद्यष्टसिद्धयः ईषत्फलं जंयमेतन्मध्यमध्यपरोषितं निरंजनाद्

मे. तं. ५०

50

त्रितयं भ्यासात्सर्वं भवेत्सफलं ऋषिर्गुरुत्वाच्छिरसि वर्णितश्छन्दसो मुखे धारणं प्रोच्यते विनियोगामा देवता हृदि अ
गतादिति यावत्तत्स्वरूपः साधको मन्तः शिवस्वार्थस्त्वविज्ञायमनस्तत्साधकस्तस्य छन्दसीति विधानतरिक्षा यो
दादिर्दानार्थको भवेत् अतश्छादकश्छन्दः विसेषाज्ञनवर्णानः कीत्यर्थकादिवृधातोः संस्तुतिर्देवता पदं
साधकाय ददातीति देवता परिकीर्तिता स्वतमानोह्यदात्मायेहृदयस्ति विदात्मकः तस्मात्तत्र नमस्कु
र्यान्मत्वयोरुद्देशेन संशयेत् स्वाहयाक्रियते सम्यक् विषयाहरणं यतः अनामातर्जनीयान्तेराकृष्टेः केति
देवयते शिरोमहावर्दिष्टवागेशि वषयात्स तनुर्गीहः यस्मात्तस्माद्वषडिति क्रियते गुलमध्याया ग्रहनार्थः
कवचथावकुं हस्तेन स्पृश्यते शरीरं तस्तु कवचं तर्जन्यानामयापितत् यथार्थं त्तानकृद्दोषड्नेत्रं त्रस्याप
जायते तस्माद्कनत्रवौषट्वजेन्यायेत्तु तस्मरेत् पकारत्वात्कुवेरादिदैवतं प्रेतमच्चरेत् भ्रान्तं विस्मादि
केरुद्रादीन् नेत्रत्रयात्मकं आध्यात्मिकादिरूपंयत साधकस्य विनाशयेत् अविद्याजातमेत्रं तेनत् फट्
शब्देन प्रपञ्च्यते प्राणायामं मातृकायाः कृत्वा न्यासान्समाचरेत् ते चैकविंशतिः प्रोक्ताः कामनाभेदतो
पि च प्रथिकादि विभेदेन नित्यत्वेनापि केचन देवताभेदतो वापि तदिहास्यं निरूप्यते पुरुषे देवते नित्या केव
लस्वरमातृका येन्यासाद्ब्रह्म वर्णायाः धर्माः सिध्यन्ति साधके ऋषिर्ब्रह्मा देवता तु मातृकाख्या सरस्वति

हलो बीजानि गायत्रीछंदः शक्तिः स्वरा मताः व्यक्तिः कीलकमुद्दिष्टं नियोगोभीष्टसिद्धये दक्षकरतलेन स्पृष्टे
चकरभेन तथा अंगुष्ठादिषु थो वामे विपर्यासेन विन्यसेत् बिंदुयुक्तान्क्रमेणैव स्वरान्न्यासोयमादिमः अयं
व्यन्यासनो न्यासः संहारन्यासउच्यते पापशत्रुक्षयाद्यर्थकर्मण्यावा समाचरेत् सविसर्गैः स्वरैर्यत्र केवलः
न्यासस्तु कलान्ते स्पष्टिन्यासः प्रयोगादौ कर्मव्यस्तस्य सिद्धये वामाकरतलान्नस्य कनिष्ठान्तं विन्यसेत् अष्टा
स्वरान् ओंकारादीन् तथा दक्षतरादपि अकाराद्यान्बिंदुसर्गयुक्तान्न्यासोयमीरितः स्थित्याख्यो मुनिदेवादि
प्रगल्भायेस्थितावयं ककारादिनकारान्तान्वर्णान्पंचदशैव हि अंगुष्ठादिकनिष्ठान्तं दक्षहस्तस्य पर्व
सु नेमेद्विंदुयुतान्सर्वान् वामेप्येवं तनादिकान् अंगुष्ठादिकनिष्ठान्तं हस्तयुग्मेपि विन्यसेत् युगप
त्पादिकान्स्व च ज्ञ्याहर्णेनमोन्तकं तत्र स्थाने करं दत्वा करस्य हृदि करस्तयं अआमध्ये कवर्गः स्यादिईमध्ये
चवर्गकः उऊमध्ये टवर्गस्तु एऐमध्ये तवर्गकः ओऔमध्ये पवर्गः स्यादंअः मध्ये तु यादिकाः पंभिः सबिंदुके
रेशुल्यादिन्यासोहृदादिकः कर्मयोग्यस्य ऋष्यादिविनियोगस्य सिद्धये षडंगमस्य हृदयाद्यादिजातपापनिहत
ये तालत्रयं च दिग्बंधं प्रकुर्यात्समंत्रतः ततो ध्यायेद्धर्मीपं पद्मे स्वतंत्रशिरसि स्थितं कार्णिकायां निजं मं
त्रं संस्मरेत्केशराष्टके स्वरयुग्मं तथा पत्रेषु षट्स्वपि चकादिकान् समवर्गान् अष्टमे तु लता मेवं विचिन्तयेत् प

मे॰ ते ५२

वंचिंतयतो रोगी मुच्यते पापसत्वैर्विनश्यति अथान्तर्मातृकान्यासं वदेऽनन्तः पुष्टिकारकं यं कृत्वा योगिनो चिन्तं पातके नप्रवर्तते मूलाधारं विनिष्क्रान्ताप्रबुद्धा शक्तिकुण्डली ज्वलत्पावकसंकाशा सूक्ष्मा तेजःस्वरूपिणी मूलाधाराच्छिरःपद्मस्य शान्ती विद्युदाकृतिः तया स ब्रह्मशिरःपद्मादमृतौघस्वरूपिणः निर्गतान्मातृकावर्णान्सुषुम्नावर्त्मना तांस्तु स्थापयित्वा स्थितांस्तेनतान्ध्यात्वा प्रविन्यसेत् कण्ठे विशुद्धिचक्राख्ये पद्मे षोडशपत्रके बुद्ध्वा स्वप्रागदलात्तत्र संस्थिताः षोडश स्वराः एवं संचिन्तयेदादिबिन्दुयुक्तं नमोऽन्तकं वदेत्स्वं च सर्वेषु वर्णेष्वयं विधिः हृदये नाहतं चक्रं ध्यायेद्द्वादशपत्रकं पूर्ववत्प्राग्दलेषु प्रागवत्कादीन्प्रविन्यसेत् मणिपूरकं तु चक्रं चिंतयेन्नाभिमण्डले दशपत्रं तत्र डादिवर्णान्प्राग्वद्विचिंतयेत् स्वाधिष्ठाने लिंगमूले चक्रं षड्दलमध्यगे चिंतयेद्वादिकांस्तत्र षड्वर्णान्पूर्ववत् मूलाधाराभिधं चक्रं पद्माकृतिचतुर्दलं वंशंषसं तत्र विन्यस्य पूर्वाशादिदलेषु च आज्ञाख्यचक्रं भ्रूमध्ये द्विदलं कमलाकृति हक्षौ ध्यायद्यं कार्यो मनसा केवलेन च स्वदेहनामया कार्यः पूर्वेण सरमर्तिषु अनादित्वान्नकृष्यादिर्बलवध्यानमस्यतु बहिर्न्यासमथो वक्ष्ये पूर्वोक्तब्रह्मरंध्रके वर्णारविंदे संध्यायेन्मातृकाख्यां सरस्वती पंचाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशिकलामिंदुकुण्डावदातां अक्षस्रक्कुम्भचिंतालिखितवरकरां त्रीक्षणां पद्म

५१

संस्थामक्षाकल्पामवक्त्रस्तनजयुरभरांभारतिंतांनमामि ललाटेनेत्रवृत्तनेत्रद्विश्रवोर्नासापुगण्डयोः ओष्ठयोर्दन्तयो
श्च मूर्द्धि वक्त्रेन्यसेत्स्वरान् वाक्कोसंधिषुसाग्रेषु कचवर्गान्न्यसेत्सुधीः तवर्गौपहेस्तद्वत्पार्श्वयोः पृष्ठदेशतः ना
भौकुक्षौपवर्गंचहृद्देशककुद्वानतः न्यसेत्तयादिवर्णान्शादिषट्कंततोन्यसेत् हृदादिकरयोरंघ्र्योर्जठरेव
दनेतथा न्यासस्तंयवर्णमात्राहीनपाठप्रश्नकः तमारभाप्रकारान्तोन्यासश्चोत्क्रियतेजदि संहारन्यासना
मा विंदुन्यास इतीरितः वाममार्गप्रवृत्तानांशक्तिसेवनकारिणां अन्तर्मातृकान्यासंविंदुन्यासंसमाकुक्षयारणं
यावत्तत्क्षिताभवक्त्रक्तिंस्तावद्योगिविधीयते वामेचैवदक्षिणेमार्गेदेवताध्यानमुच्यते अतःतंजहरिणपानमुदय
टंकविद्याकरैरविनरंदयन्तींत्रिनेत्रां अर्द्धेन्दुमौलिमरुणामरविंदवासांवर्णेश्वरींप्रणमतस्तनभारनम्रां श्रा
क्रैर्मनोरथैरण्णांविसर्गन्याससमाचरेत् ततोविंदुःपतेत्तस्मादतोविंदुविसर्गको न्यासोपेक्षोयदाश्रुकवी
मितःकौलिकस्यवा शाक्तोस्तुपिविनासर्गन्यासेनापिविनाच्युतेत तदासौनिरयंयातियावच्चंद्रदिवाकरौ
इहलोकेऽपिवंशःस्याद्धिहीनोब्रह्मतेजसा भोगमोक्षधियावापिसपतितंयेसमुद्यताः विनामंत्रंसर्पमणिं
नेगृहीतंसमुद्यताः विसर्गमातृकान्यासःभवेत्केवलमातृवत् विशेषस्तुविसर्गान्तोवर्णोच्चारोभवे
दिति विंदुसर्गयुतांअआदिन्ठान्तान्वर्णान्नस्यैतोन्यसेत् केशवःकीर्तिसंयुक्तःकांतिर्नारायणान्विता मा

मे॰
तं॰
५२

पवस्त्वाष्टिसंयुक्तोगोविंदः पुष्टिसंयुतः विष्णुर्धृतिसंयुक्तः शान्तियुङ्मधुसूदनः त्रिविक्रमः क्रियायुक्तोवा
मनोदयान्वितः श्रीधरोमेधयायुक्तोहृषीकेशस्तुहर्षया पद्मनाभयुतःश्रद्धालज्जादामोदरान्विता वासुदेव
स्तुलक्ष्मीयुक्सङ्कर्षणःसरस्वती प्रद्युम्नःप्रीतिसंयुक्तोनिरुद्धोरतिसंयुतः चक्रीगदाजयादुर्गाशार्ङ्गीनि
प्रभयान्वितः खड्गीतुसत्ययायुक्तः शंखीचण्डीसमन्वितः हलिवाणीसमायुक्तोमुशलीचविलासिनि
शूलिचविजयायुक्तःपाशीविरजयान्वितः अंकुशीविश्वयायुक्तोमुकुंदःविनदायुतः नंदजःसुनंदायुक्तो
नंदीस्मृत्यासमन्वितः नरोर्ध्ययानरकजितःसमृद्ध्याशुद्धियुक्हरिः कृष्णोबुद्ध्याभूत्यासत्योमत्यासा
त्वतःस्मृतः शौरीक्षमेशूरःउमेजनार्दनउमान्वितः भूधरःक्लेदिनीयुक्तोविश्वमूर्तिस्तुक्लिन्नया वैकुण्ठो
वसुधायुक्तोवसुदापुरुषोत्तमो बलिवपरयायुक्तोबलानुजपरायणो बालस्तुसूक्ष्मः वृषघ्नस्तुसंध्यायुक्
सरयावृषः हंसप्रभासमायुक्तोवराहोनिशयान्वितः विमलोमेधयायुक्तोनृसिंहोविद्युतायुतः केशवाद्या
मातृकोक्तायादियोगस्तुपूर्ववत् अथशैवहितावेद्यश्रीकण्ठादिकमातृका मुनिःस्याद्दक्षिणामूर्तिर्गाय
त्रीवृद्द रितं अर्द्धनारीश्वरोदेवोनियोगःसर्वसिद्धये हसौबीजानिगुह्येतुपादयोःस्वरशक्तयः कुसदी
र्घान्तरेकृत्वाप्राग्वद्वर्गान्हसौमयः षड्दीर्घसंयुतात्कृत्वाषडंगादेन्यसेत्ततो बंधूककाञ्चननिभंरुचिराक्ष

मालांपाशांकुशौचवरदंनिजवाङ्करैः विभ्राणमिंदुसकलाभरणांत्रिणेत्रमंद्दीविकेशमनिशंवशुरांश्रया
मः ह्सौन्तेमातृकामुक्तादेवान्तेचसमुच्चरेत् द्वन्द्वे इन्नाचतत्क्षिन्नमोन्तामातृकास्थल तंगसर्व्वासम
दास्थिमज्जाशुक्राणप्रसुन्वदेत् शक्तिक्रोधतथान्मानेडैं. तयाद्विकेशस्वपि श्रीकण्ठपूर्वोदेव्योचाननेनावि
रजयान्वितः सूक्ष्मेशः शाल्मलीयुक्तोलोलाक्षीयुक्त्रिमूर्त्तिकः अमरेशोवर्तुलाद्वादीर्घीशोदीर्घघो
षया भारभूति दीर्घमुखोतिथिशोगोमुखीयुतः स्थाणोदीशोदीर्घजिह्वायुगवरः कुण्डोदरीयुतः कुं
केशपाचऊर्ध्वकेशोभौतिकोविकृतास्यया सद्योजातोज्वालामुख्यानुग्रहोशीयंसुखीयुतः अक्रूलस्त्रीमु
खीमहासेनोविद्यामुखीयुतः क्रोधेशश्चमहाकाल्याचण्डेशनसरस्वती पञ्चान्तकः सर्वसिद्धिगौर्यायुक्तः
प्रकीर्तितः शिवोत्तमेशोविन्यासोयुक्तस्त्रैलोक्यविद्यया एकरुद्रोमूत्रशक्त्याकूर्मेशश्चात्मशक्तियुक्
एकनेत्रोभूमिमातायुक्तोथचतुराननः लंबोदर्यायुतःप्रोक्तोस्त्वजेशोद्राविणीयुतः सर्वेशोनागरीयु
क्तः सोमेशः खेचरीयुतः लांगलीशश्चमंजर्य्यादारुकेशेनरूपिणि वीरिण्याचार्द्धनारीशोह्युमाकान्तःयु
नःयुतः काकोदर्यातथाषाढीपूतनायुक्तदण्डीरितः पूर्वोक्ताएवमन्यथाः षडङ्गध्यानमुच्यते सिंदूरकान्ति
ममितामरणंत्रिनेत्रोविद्यातसर्वत्रमस्वपानवरान्दधानो पार्श्वस्थितांभगवतीमपिकाञ्चनाभां ध्यायेत्कराज्ज

ब्रह्मचारिणिः

से. तं.
५३

53

धृतशुक्लकवर्णमालां न्यासात्कार्यास्तु वक्त्रभिः स्थितिसंहारसृष्टये: संहारसृष्टिस्थितयो गृहस्थस्य तु न्यसे
त्क्रमात् वानप्रस्थाश्रयिणे तयोः सृष्टिस्थितिलयत्क्रमात् न्यासात्कुर्यादिति प्रोक्तः स्थितिसंस्तविस्तरः व
दो कलामातृकायां न्यासतत्त्वबहोषिः स्मृतः प्रजापतिश्च गायत्री छन्दश्चास्या तु देवता सरस्वती मातृका
ख्यातियोगोऽभीष्टतुष्टये तारेषंडगं कुर्वीत ह्रस्वदीर्घान्तरस्थितैः ह्रस्वैः पञ्चरथ्यागगुणमथ हरिनेत्र
स्तकं वर्णमालां टंकशशुभ्रकपालदलसमनलसर्द्धमकुम्भं वहन्ती भक्ताविद्युत्प्रयोदस्फटिकमणिजपावं
धूरैः पञ्चवक्त्रैः अदेवत्तो जनमंत्रा सकलशशिनिभां शारदां तानमामि ध्यात्वैवं नारस्वती नामका राद्याश्चमा
तृका विंदुयुक्ताङेन्तकलामापृथान्नमस्तान्विता पूर्वोक्तमुद्दमाङ्गाणगमासस्थानेषु विन्यसेत् निहन्ति सृष्टिप्र
तिंताच विघ्नशान्तिस्तथैथिका दीपिका रेचिका चापि मोचिका चपलाभिधा सत्तमा सूक्ष्मा सूक्ष्मा भिन्नानामृ
चाप्यायनी तत आपिनी व्योमरूपा च नन्ता सृष्टिः समर्थिका स्मृतिर्मेधा तथा त्मः कान्तिलक्ष्मीर्द्युतिः ९
स्थिरा स्थितिः सिद्धिर्जरापालिनी च शान्तिकनीश्चर्निका नतिः कामिका वरदा चान्याह्लादिनी प्रीतिसंयती दीर्घा
गौण्या रौद्री भयानिद्रा च रुद्रिका तथा स्त्यान्यक्रोधिनी पचीन्त्क्रियान्काली समृद्धका पीनांचनान् — यवदाडि
तानन्याप्यान्विता उक्तो कलामातृके च स्थाने कानादिकन्यसेत् तत्रनादान्मनाजानाः स्वनजाः समसदाशिवान ५३

अक्षमालां पुस्तकं च पद्मं चापि कपालकं हस्तैर्दधत्स्या ध्येयास्ता पीतगंधाऽनुलेपना स्तो ध्येयास्ताः पीतगंधानुलेप
नाः विसर्गान्तकारात्संजाताः अतवर्गकला दश शूलाभयशंखवरीवरहस्ताः स्मितविताः मकाराद्ड्इतोजाताः
पयवर्गकला नव शरत्वंदुनिभा हस्तैरभयं शूलमेव च कपालं च वरं ध्येयो दधत्यः इति साथकैः षकारादिकयं चारा
मीस्वराविंदुतो भवेत् अभयं हरिणं टंकं वरं च करपल्लवैः दधत्यो रक्तवर्णाभ्र ध्येयान्यासे कलात्मके केशवा
दि मातृकायाः सोथ्य नारायणो मुनिः अमृताद्यात गायत्री छंदो लक्ष्मी हरिः स्वरः ह्रि रक्तैः शक्तिश्रीकामैः
षडंगानि समाचरेत् शंखचक्रगदापद्मकुंभादर्शाब्जपुस्तक बिभ्रन्तं मेघचपलाविसालं लक्ष्मीहरिं भजेत् श
क्तयस्तु प्रियाः केशुनि षर्ग्नीः सस्मिताननाः एवं ध्यात्वान्यसेत्क्लिं श्रीकामपुटितादयं नारादि हृदयान्तोथके
शवाद्याश्च शक्तयः भ्यान्तान मोन्ताऽस्वार्थ्यां स्याने कादिकेन्यसेत् कलामात्रान्तशाक्तानां नित्योयं विसृसेवि
नो ईरितः दण्डीशो भद्रकालीयुग्गत्रीशो योगिनीयुतः मीनेशः शंखिनीयुक्तो मेषेशस्तर्जनीयुतः लोहि
तः कालरात्र्याच शिखीशः क्लेदिनीयुतः छगलंडः कपर्दिन्याद्विरण्डशाश्च वज्रया महाकालो जयायुक्तो वा
लीशः स्वमुखीयुतः भुजंगो रेवतीयुक्तः पिनाकि माधवीयुतः खड्गीशो वारुणीयुक्तो वकेशो वायुवीयुतः
श्वेतो रक्तो वथाविरूपाश्रयः सहजयायुतः नकुलीशो लक्ष्मीयुक्तः शिवेशो व्यापिनीयुतः सवर्त्तको महामायायु

मे॰
तं॰
५४
54

क्रमपतास्तु मातृकाः श्रीकण्ठाद्या यईशान्तास्तत्र नेत्रं प्रयोजयेत् सर्वे रुद्राः स्मृता रक्ता धृतशूलकपालकाः शक्तयो
रुद्रपीठस्थाः सिंहरारूढविग्रहाः रक्तोत्पलकपालाभ्यामलंकृतकरांबुजाः येनोपास्यां महाविद्यां दशांतस्यापि
कीर्तिता । भुवनेशीबीजपूर्वं मातृकान्यासेनेश्वराः ऋषिः शक्तिस्तु गायत्री छंदः स्यान्मातृकामयी भुवनेशी
देवताथ नियोगः स्वेष्टसिद्धये कृत्वा दीर्घान्तरगतैः स्वबीजैर्दीर्घसंयुतैः मायबद्धैः षडंगं स्याद्ध्यानमथोदितमेव
च उद्योत्कोटिदिवाकरप्रतिमरातं गोरु पीनस्तनी वह्नीर्दैडुकिरीटहाररसनामंजीरसंशोभिता विभ्राणं
करपंकजैर्जपवटिं पद्मांकुशापुस्तकं दिश्यात्ताज्जगदीश्वरी त्रिनयना पद्मासनीषर्मीस्तरवे लज्जाबीजपूर्वम
क्षो मातृकान्यासयवहि भुवनेशीमातृकाण्यासोकैर्यत्रसाथने श्रीबीजपूर्वतः कार्यो लक्ष्मीकामैः शुह
स्थितैः ऋषिर्भृगुश्चगायत्री छंदो मातृस्वरूपिणी लक्ष्मीत्वदेवताप्रोक्ताहरस्यानेशरोकुरु न्यासार्थेत्वषडं
गादेः शेषं श्रीबीजपूर्वकैः विद्युद्दामसमप्रभा हिमगिरिप्रख्यैश्चतुर्भिर्गजैः ग्णएग्रद्ग्एरसमहृतामदेपने
रात्सिच्यमानां भिमां ॥ बिभ्राणाकरपंकजैर्जपवंटीपद्मद्वयं पुस्तं भास्वद्दत्त्वसमुज्ज्वलाकुचनतां ध्यायेज्जग
त्स्वामिनी काम नामा त्वमित्थं थंकाम बीजादिपूर्वकं कुर्याद्वमातृकान्यासमन्तिसमोहनेमतः गायत्राछ
न्दउदिष्टं देवता मातृकामयी संमोहनिनामदेवी पूर्वयुग्माषडंगकं बालार्ककोटिरुचिरांस्फटिका

तमालाकोदण्डमिक्षुजनितं स्मरपंचबाणान् विघ्नं बहुस्तकमलै र्दधतीं त्रिनेत्रां ध्यायेत्समस्तजननीं नववं
द्रचूडं शक्तिश्रीकामबीजादिमातृकान्यासमेनोन्दद्या शत्रुबाधामंत्रदोषानशयन्निवकृष्वर्णिताः महासंमोह
ऋषिर्गायत्रीछंदईश्वरितः संमोहनीनामदेवीन्यासप्रभमातृकासमः ध्यायेयमत्तवलयेक्षुशरासपाश पुष्प
हृयांकुशाशरान्त्रवींडुस्तकं च धाविभ्रतीं निजभुजैररुणांकुचान्तां संमोहिनीं त्रिनयनां नववंद्रचूडं सर्व
विघ्ननिरासार्थमवश्यन्यासमाचरेत् गणेशमातृकायास्तस्य मुनिर्गणककईरितः निवृच्छंदपत्रिकाछंदो
देवः शक्तिविनायकः स्वरबीजाद्याप्यायांतगन्धिताध्यायेज्जमाननं शूलांकुशवराभीतिपाणिंकाजहस्तया
प्रिययालिंगितं रक्तं त्रिनेत्रं गणपं भजे एवं ध्यात्वा न्यसेत्स्वीयबीजपूर्वान्स्वरान्वितं विघ्नेशः श्रीसमायुक्तो विघ्न
राजः श्रीमायुतः विनायकपुष्टियुक्तः शान्तियुक्तः शिवोत्तमः विघ्नकृत्स्वस्तिसंयुक्तो विघ्नहन्ता सरस्वती भय
स्तुस्वाहयायुक्तोसकदन्तस्तमेधया द्विदन्तः कान्तिसंयुक्तो गजवक्त्रेण कामिनी निरंजनो मोहिनीयुक्तः कपर्दी
नूनदीयुतः दीर्घजिह्वः पार्वतीयुक् ज्वालिन्या संकुकर्णकः वृषध्वजो नंदयायुक्तस्तयस्तागणनायको गजेंद्रः
कामरूपिण्याश्शूर्पकर्णस्तथोमया त्रिलोचनस्तेजोवत्या रमोदरस्तुसत्यया महानंदस्तु विघ्नेशा चतुर्मूर्तिः
स्वरूपया सदाशिवः कामदायुक् आमोदो मदजिह्वया हमुखोभूतिसंयुक्तः समुखो भौतिकायुतः प्रमोदः

मे. तं. ५५

55

सितयायुक्तः एकपादो रमायुतः द्विजिह्वो महिषीयुक्तः शूरस्यापि भुजंगिनी वीरो विकर्णयायुक्तः षण्मुखो भृकुटीयुतः वरदो
लज्जया वामदेवस्यादीर्घघोणया धनुर्द्धरा चक्रतुण्डो द्विरंडो जामिनीयुतः सेनानी रात्रिसंयुक्तः कामांधो ग्रामणीयुतः मत्तः श
शिप्रभायुक्तो विमत्तो लोललोचना मत्तवाहनश्चंचला जटी दीप्तिसमन्वितः मुंडी सुभगयायुक्तः खड्गी दुर्भगया तथा वर
ण्यश्च शिवायुक्तो भगया वृषकेतनः भक्तप्रियो भगिन्या तु गणेशो भोगिनीयुतः मेघनादः सुभगयायुक्तो व्यापी स्या
त्कालरात्रियुक् गणेश्वरः कालिकेति प्रोक्ता विघ्नेशमातृकाः त्वगादियोगो यादिनी सर्ववत् परिकीर्तितः प्रपंचया
गमासोथ वेदेति भुक्तिमुक्तिदः महागणेशमंत्रेण प्राणायामत्रयं चरेत् ऋषिः प्रपंचयागस्य गणकः छंद ईरितं
गायत्री तु निचृद्देवो महागणपतिः स्मृतः शीर्षादिषु न्यसेत्तां स्वर्गं वीजं चापि गुह्यके स्वाहा शक्तिः पादयोश्च
नियोगो भीष्टसिद्धये ॐ श्रीं ह्रीं क्लीं ग्लौं गं गमाति पूर्वषड्दीर्घयुग्मकं उच्चार्य्य कुर्य्यादंगानि तथा गुह्यादिषु न्यसे
त् तालत्रयं तथा रक्षणं कृत्वा दिग्बंधमाचरेत् तर्जन्यंगुष्ठयोगेन दशादिक्ष्वथ चिंतयेत् हस्तीन्द्राननमिन्दुचूडः म
रुणच्छायं त्रिनेत्रं रसादाश्लिष्टं प्रियया सपद्मकरया स्वांकस्थया संततं वीजापूरगदाधनुस्त्रिशिखयुक् चक्राब्जपा
शोत्पलव्रीह्यग्रस्वविषाणरत्नकलशान् हस्तैर्वहंतं भजे महागणपतेर्मंत्रमष्टवारं जपेत्ततः गमित्येकाक्षरं वीजं
गणकोस्य मुनिर्मतः देवो विघ्नेश्वरश्छंदो निचृद्गायत्रिनामकं प्रपंचाख्ययागस्य साधितासिद्धिहेतवे चतुस्वरा

तिंशसंख्याजपार्थविनियोजनं अथषड्दीर्घयुक्तेनकुर्यादंगानियेनतत् दन्तपाशांकुशवरकरंब्यदंतचन्तुण्डिलं सी
हस्ताभंचंद्रमौलिंसर्पभूषंगलन्मदं एकवारंजपेदस्याञ्चतुर्णानांतंनिवेदिकं गणेशमालामंत्रस्यमुनिस्तुगणकः
स्मृतः छंदोमितंगणपतिर्देवतापरिकीर्तिता क्लींक्रांकारोनमःसर्वंडेन्तंविद्यादियंततः सर्वार्थसिद्धिदायुति
सर्वडःखप्रशेतिच ततोमनायपश्चेहिभगवनन्त्वाद्देयेतिच स्तंभयेतिहृदयंक्लींगंगाननमोवक्त्रिगेहिनीं क्रांक्रीं
मित्स्यंपंचपंचाशद्वर्णोमंत्रउच्यते जपेदिदंचतत्वीरंमन्वादिसहितान्यसेत् न्यासपूर्वंत्रिवारंतमातृकाध्यान
पूर्विकां स्वरादिसप्तवर्गैस्तद्वहान्तमप्रविन्यसेत् मूर्वेवाह्वोःपादयोश्चजठरेहृदयेक्रमात् तारमायाश्चहस
श्रस्वाहेतिवैषुनः प्रपंचयागमंत्रायमष्टार्णःसमुदीरितः प्रपंचयागमंत्रस्यमुनिर्ब्रह्मासमीरितः परमाद्यास
मारव्यातागायत्रीछंदउच्यते महापरंसमाख्यातंदेवताविस्मयात्मकं अव्यक्तचोयितंनित्यंसर्वव्यापिनिरंजनं वि
स्तामगैःपंचपरैःप्रपंचमनुसम्भितैः ह्रस्वदीर्घान्तस्थकादिवर्गैःपूर्वसमन्वितैः तारमायादिकैःस्वेष्टयुक्तैर्हरि
हरादवैः षडंगानिप्रकुर्वीतजातियुक्तानिदेशिकः वेदादिपंचमनुभिःपरिवीयमान मौनैरगम्यमतिशंज
गदेकमूलं ॥ सन्निम्नमत्तगमनश्चरमच्युततेजः परंभजतंसादहंपापराशिं वेदादिमाययोरंतेतद
कारान्तास्तविंदुकान् एठगुरुत्वार्यहंस्वाहेतिवदंतेहृदि विम्बवयेदिमान्वर्णानानामवक्रोजहाम्यहं एवंकृताम्

काद्यन्तमकाराद्यायुगमर्ऊनत् विसर्गान्तासहकारान्तं विन्यसेन्मातृकास्थले एवंप्रपंचयागाख्यो मातृकान्यास ईरितः
एकविंशतितो योगपीठाख्यन्यासमाचरेत् तत्त्वमंत्रं च ततः स्वस्वमंत्रस्य संचरेत् प्राणायामत्रयं कृत्वा मूलमंत्रेण सा
धकः विन्यसेत्तद्दिग्विदिक्षु देवता नियथाविधि करांगन्यासमुख्योक्तन्यासेन न्यासमाचरेत् [illegible]
[illegible] तत्तत्कल्पादितात्पश्चात्तत्तन्मुद्रां प्रदर्शयेत् आगमोक्तेन मार्गेण न्यासान्नित्यं करोति यः देवताभाव
माप्नोति मंत्रसिद्धिः प्रजायते। यो न्यासकवचच्छन्नो मंत्रं जपति यः प्रिये। दृष्ट्वा विघ्नाः पलायन्ते सिंहं दृष्ट्वा यथा गजाः
न्या अकृत्वा सजालं जो मृत्युमात्माऽक्षरः कृते जपं विघ्नैः सर्वात्तु नूनं बाध्येत् [illegible] गिशिखर्यया न्यासानां प्रचुरत्वेन फलानाम
पि भूरिता ऋष्यादिन्यासोऽमहितः [illegible] तत्कामनाश्चरेत् ओं ह्रीं मिति [illegible] जात्वा मुद्रायावं यथा स्मरेत् दर्शयेन्मूल
मंत्रेण हस्तविज्ञानं सन्त्यजेत् ध्यानं कुर्यात्ततो मंत्री तत्तत्कल्पोक्तवर्त्मना तदपि द्विविधं प्रोक्तं सगुणं ध्यानमुच्यते
यज्जीवब्रह्मणोरैक्यं सोऽहमस्मीति वेदनं तदेव निर्गुणं ध्यानं मतं वेदविदो विदुः अथान्तर्यजनं वक्ष्ये यथावद्वक्ष्यथार
य वामनादी समाकृष्य किंचिदाकुंचयन् इदं रेचयेत्समार्गेण जिह्वान्तालुगतां स्मरेत् शक्तिशिवपरे याज्यं किंचि
दाकुंचयद्दथः कृत्वैवं तु यजेत्पीठं न्यासमार्गेण मंत्रवित् तस्मिन्स्थितां स्थितामिष्टदेवतामूर्तिविग्रहां ध्यात्वा यजे
च्चेदनाद्यैर्मानसैर्भोजनान्तकैः भोजनावसरे तत्तच्चक्रदेवं समाचरेत् शक्तिशिवपरे याज्यं किंचिदाकुंचयद्दथः

२=२

कृत्वैवं तत्पमेत्सीवंन्यासमार्गेण मंत्रवित् तस्मिन्पीठे स्थितामिष्टदेवतामूर्त्तिविग्रहां ध्यात्वा यजंश्चंदनाद्यैर्मानसैर्भोज
नांतकैः भोजनावसरे त्वेतद्वैश्वदेवं समाचरेत् मूलाधारे स्मरेत्कुण्डकुण्डल्याग्निसमुज्ज्वले आत्मान्तरात्मपरमज्ञाना
त्मचतुरस्रके धर्माधर्मान्विते ह्यत्र मूलमंत्रपुरःसरं अहं जुहोमि स्वाहेति प्रत्येकं जुहुयात्ततः अहंतासत्त्वपे
शून्यकामक्रोधादिकं हविः मन एव स्रुवः प्रोक्तः स्रुग्भक्तिस्तु गुरूदीरिता तदन्ते तन्मयो भूत्वा जपेदष्टोत्तरंश
तं मूलं तत्सर्वं संपन्नां देवताये निवेदयेत् ततः प्रणम्य च गुरुं पूजाचक्रं समुद्धरेत् स्ववर्णरचिते पीठे भूपाला
वशवर्त्तिनः रजतेन कृते यंत्रमायुरारोग्यकामं स्वामिणे रचितं यंत्रं सर्वैश्वर्यप्रदं मतं पंचतत्त्वमहादिकं स्वच्छं म
नोभिलषितं ददेत् मानिक्यरचितं यंत्रं राज्यदं तत्किमुक्तिदं कृतं मरकते यंत्रं सर्वशत्रुविनाशनं लोहत्रया
त्मकं यंत्रं सर्वसिद्धिकरं मतं श्रीखण्डे शांतिदं ज्ञेयं पौष्टिकं रक्तचंदनं श्रीपर्णीपीठपूजार्थं धनराज्यदं वे
डूमेवफलासंपत्तभूर्जपत्रे च तत्प्रदाः गण्डकीभवपाषाणे भक्तिमुक्तिरहस्यतः भूमौ सिन्दूररजसा रचितं सर्वका
मदं सीसकांस्यादिषु कृते संपत्तिं संततिं हरेत् फलकाद्यापरे भिन्ने स्थापयेन्न कदाचन स्थण्डिले यदि मोहेन
नाशयेन्नेनकुलं अग्निरंगुलविस्तारं प्राक्प्रत्यग्दक्षिणोत्तरे पलप्रमाणकं नेव्यमर्घ्यं पीठं मनोहरं पंचा
ङ्गं प्रकल्पितं चतुरस्रं समन्ततः तस्मिन्पीठे तु निर्माणं पूजाचक्रस्य कारयेत् मालिक्यादिकपीठं तु मानसूत्रं

ग्र

मे॰
तं॰
५७

नदोषकृत श्रीपर्णीचंदनादीनामपिकंचेद्दोषकृत लग्नेशुभग्रहोपेतेकुलेगुणशालिनि अभिषिंकारयेद्दोषांस्त
दादितिध्यादिकोदशे दोग्द्राज्यवृद्धये: प्र[illegible]मंना[illegible]केलाभस्थाततः अभिषिच्याथतोयेनक्वथितेनर्दशैषधे:आ
वाज्यालंपचंतलग्नेचक्रस्थाघपूजयेत गंधपुष्पैर्नैवेद्यैर्धूपैर्दीपैर्नैवेद्यदर्पणै: त्रिरात्रंपूजयेद्देवींत्रिसंध्यंचतथा
निशि मकारैपंचभिर्युक्तैर्वरयुवामिनार्चने शिष्टायांशक्तिपूजाचहर्तीभागंचकौलिका: एवंदिनत्रयंकृत्वा
ततोनित्यक्रममभजेत एवंदेवीप्रतिष्ठायांक्रम:सान्निध्यकारक: स्त्रीशूद्राणांवामिनाचकौलिकानामयंविधि:
महापापंनकुर्वंतिपश्चवेदमार्गगा: अग्नि:शुचिर्वतनम:शुचिर्वैतेविप्र:शुतीरितं आदानंजैश्चलयु
भि:साध्यावंधननाशिते: पातकैस्तुनलिप्यन्तेनस्मात्तैपशव:स्मृता: वामेणोपासितंयंत्रंसूर्याग्निसमतेजसं
पापिनांदृष्टिदहेनस्तूलकानंयथारवि: यथाम्रर्क्षिदिनकरावेयसर्वनिविद्यते दत्तसंस्थापितंयंत्रंतथापुण्यम
लीमतं सर्वतोषामवभूतानांतत्पद:खस्खादभो वामदक्षिणहस्तौचतद्धन्मौग्रादिवौकसा प्राथान्यंतत्पुरुषी
तांवामांगोदक्षिणांगके पुंसांतथैववामार्गेपिकार्याकार्यविभेदत: कुण्डश्चगोलकाजातिविच्युताश्चयेविप्रा
स्तेव्रात्या:परिकीर्तिता: ब्राह्मणोह्यानिकृष्टेषीमत्स्यमांसनमैथुनं अब्राह्मणवामार्गप्रवृत्यस्तेस्तसेवितं कौ
लवामेनसिद्ध्यन्त्यवनसंशये: सिद्धासंजायतम्यषांनरकायैवकेवलं आदौवेदादितैर्मंत्रविप्राग्मनारणोचरेत ५८

धातुनिर्मितयंत्राणांप्रतिमाणांविशेषतः अग्निः सम्निंवाजमितिसमर्वीसमिक्च्यते मनिस्त्रिष्टुप्छन्दउक्तं देवताग्निः
प्रकीर्तितः अग्निशब्देन रहितं सूक्तमेतज्जपेत् अविषिंचेच्छुद्धतोयैस्ततः संपूर्णंसूचकैः अन्यषिंचेच्छुताद्य
मा॰ग्मन्त्रारणमिदंततं तालयेद्यान्त्र्यायंत्रमादाद्यंलेनतिल्प्रैः पिष्टातकाद्यैः काष्ठस्यमण्यादेः केवलंजलात्
पूर्वंप्रक्षालितंयंत्रं मन्दयेच्चंदनादिना पुरतस्थापयेत्पीठेदद्यात्पुष्पांजलिंततः मूलमंत्रनाथवामेस्वस्यदेवा
ग्रतश्चरेत वृत्तेनवेष्टितंसम्यक्त्रिकोणंचन्दनांभसा तद्वहिश्चतुरस्रंचविदध्यान्मत्स्यमुद्रया संपूज्य गंधैर्दर्वा
र्घमण्डलायनमोण्डना अग्ना नेचरेष्पादिकोणेषुपुरस्तथा दिक्षुचास्त्रंसमभ्यर्च्य शंखाधारंप्रविन्यसेत् आ
पा धारेणविनात्रस्मान्नत्स्मेत्रिवमातरः तस्माद्विधिवदाधारंविपदंवाचतः पदं पद्माभंवात्रिकोणंवायोन्याभंथा
तजंभ्रतत् मूलान्तेचात्मकाधारपात्रंसंस्थापयानिच उंकारंखादिकाधारंमण्डलेस्थापयेदथ मंत्रंथमंप्र
देसुक्त्वावदेहूंशाकलात्मकं फेनंवह्निर्मण्डलंचदेवनामचकीर्तयेत् ततः र्घपात्राधारायनमः प्रोक्त्वाप्रपूज
येत् वह्नेर्दशकलाः पूज्यास्तत्प्रोक्तः प्रदक्षिणं अस्त्रमंत्रेणचततः कनकादिविनिर्मितं अर्घ्यादिपात्रम
थवाशंखमंत्रेणनंजलैः प्रक्षाल्यात्मकदेवार्घ्यपात्रंप्रतिष्ठापयामि एवमुक्त्वातदाधारेसंस्थाप्येवंवदेत्सुनः
अर्घ्यप्रदेद्वादशेतिकलात्मनेवदेत्ततः सूर्यमण्डलमुच्चार्यफेंतदेवस्यनामत अर्घ्यपात्रायचनमोमननाते

मे.
ते.
५८

जयेत् तस्याग्रमथ तत्रैव भावयेद्वह्निमण्डलं षट्कोणं तत्राङ्गानि पूजयेत्सर्वं वह्नेः कला द्वादश सूर्यस्य प्रोक्ताः पात्रे प्र
दक्षिणे ततः सुधामयैस्तोयैर्मूलान्ते मातृकां पठन् विलोमां पूरयेत्तस्मिं पूजको मनुनामुना उं सं कामप्रदेत्सुधाषो
डशेति कलात्मने नमः पञ्चदशाक्षरीयमन्त्रं शंखप्रपूरये गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपान् दूर्वाश्चेत्यर्घ्ये
पात्रस्य प्रोक्तं द्रव्याष्टकं ततः तन्नोयं गन्धपुष्पाद्यैः पूजयित्वा समर्चयेत् कला षोडश चान्द्रं पश्चात्सर्वकलास्व

प्र

च प्राणांतिष्ठां कुर्वीत पूजान्ते साधकस्ततः प्राग्वत्तीर्थं समावाह्य मूलमन्त्रेण तत्र तु संयोज्य नेत्रमन्त्रेण वी
क्ष्य तस्य शिखान्तेन प्रदर्श्य मालिनीमुद्रां मुद्रयाथानुसन्तया अमृतीकृत्य विधिवत्तथा विजने साधकः
ध्यात्वेष्टदेवतां तत्र सकलीकरणं चरेत् अङ्गन्यासेन चास्त्रेण कलयेच्छूलिकाद्दिशो दश नेत्रमन्त्रेण संवीक्ष्य मुद्रया

पृ५५

संरक्ष्य तया अवगुण्ठ्य ततो धेनुमुद्रया योनिरूपया गन्धपुष्पादिभिस्तत्र पूजयेदिष्टदेवतां षडङ्गानि च संपू
ज्य मन्त्रयेत्तरमन्त्रतः अष्टत्वस्तत्र चार्घ्यं छादयेन्मत्स्यमुद्रया तदर्घ्यस्थं जलं किंचिन्नाभतोये विनिःक्षिपेत्
अर्घ्यस्यान्तरदिशाग्रे पाद्यमाचमनीयकं मधुपर्कं च संस्थाप्य त्रिकोणे तु यथाक्रमं एकैकपात्रं मूलेनाष्टकृ
त्वाभिमन्त्रयेत् मधुपर्कस्तु सक्षौद्रं दधि तद्घृतलभ्यते दधिक्षीरं गुडः क्षौद्रे ह्न प्रतिनिधिर्न हि परं यत्र वेदे
वामपुसंज्ञनश्च्यते तदाप्यतेयेन कर्मतत्प्रोक्तं मधुपर्ककं कांस्यस्य वाप्यपरोप्यस्य शैवशङ्खपरीहारो महांश

रवावाममार्गे स्फाटिकं ग्रहनायके दक्षिणे प्रोक्षणीपात्रं मंदयाद्भिः प्रपूरयेत् किंचिदर्घ्याम्बु संगृह्य प्रोक्षणं प्रसि
योजयेत् पुनराचमनीयार्घ्यपात्रे संस्थापयेत्ततः पाद्यं श्यामाकदूर्वाब्जविष्णुक्रान्ताभिरुच्यते जातीलवंगकं ।
कोलैमतमाचमनीयकं कुशापुष्पजवव्रीहिवज्रमूलतमालकं दापयेत्प्रोक्षणीपात्रे शालिलं प्रणच स्प
द्धाभिरद्भिर्विहितं पुनराचमनीयकं द्रव्याभावे तथाः कालिताः स्तण्डुलाः शुभाः अर्घ्याघ्र्यादिक पात्राणां प
लं वदे प्रशुभाशुभं सर्वकामप्रदं स्वर्णे रौप्यमायुः प्रदं सौभाग्यं ताम्रपात्रेण धर्मवृद्धिस्तु मृन्मयी ना
रिकेले देवतुष्टिः शुक्तिकृताच संभवे लक्ष्मीप्राप्तिर्विल्वपात्रे बालएयवलवृद्धजे मारणोच्चाटने लोहं स्फभः पा
षाणजे भवेत् मंत्रसाधने काष्ठं वाममार्गे तु नौविकं रत्नादीनां तु पात्राणि शुभेरवो कितानि च अर्घ्यनैवेद्य
पूजार्थं बलिदाने प्रकल्पयेत् पात्राणामादरः कार्यः पात्राण्येवोत्तमानि च बलिहोमक्रियार्थं हि विना पात्रं न सिद्ध्य
ति षड्त्रिंशद्दशलं पात्रमुत्तमं परिकीर्तितं मध्यमं तत्त्रिभागोनं कनिष्ठं द्वादशांगुलं वस्त्वगुलविहीनेनृनपात्रं का
रयेत्क्वचित् नाभिविद्धं विरूपाणि पुण्डरीकाकृतीनि च शंखनीलोत्पलाभानि पात्राणि परिकल्पयेत् सेता
दीन्यतिशस्तानि चित्राणीनां क्रमेण च सेवयेत्प्रोक्षणीपात्रे तोयेमल्लास्तु मर्च्चयेत् आत्मानं यागवस्तूनि पूजाद्रव्या
णि मण्डलं दर्शयेद्देवमुद्रां चक्षुरासिद्धिरियं मता योगपीठन्यासदेवानतमस्थाने पूजयेत् मणिपीठभावन

रमध्यानि

यातत: पूजास्वदेवता आत्मानं देवतारूपं ध्यायेन्मूलेन पंचवत्तु पुष्पाञ्जलयो देया मस्तके हृदये गुदे पादयोः
सर्वगात्रे च पूजयेच्चंदनादिभिः चतुर्भिरुपचारैश्च नैवेद्यं विनिवेदयेत् गुरूपदिष्टविधिना शेषमस्मै समापये
त् प्राच्यानपदिः प्रयुंजीत सर्वमेतत्समाहितः ततस्त्वान्तरं कार्यं मयि कार्यं ब्रवीमि ते मूलाधारे चतुःको
णमग्निकुण्डं विचिन्तयेत् तत्राग्निकुण्डलीरूपं ध्यात्वा मूलं समुच्चरेत् धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा
सुषुम्नावर्त्मना नित्यमेकहं सीं जुहोम्यहं ॥ पुण्यं जुहोमि स्वाहेति श्लोकान्ते प्रोच्चरेत्पुनः पुनर्मूलं पुनः श्लोकः
पुनः पापं जुहोमि च कृताकृते च संकल्पाविकल्पा धर्मपवच हुत्वा पृथक्स्वाहान्तं पुनः श्लोकमिमं पठे
त् प्रकाशामर्षहस्ताभ्यामवलंब्योन्मनीस्रुचं धर्माधर्मकलास्नेहपूर्णं वह्नौ जुहोम्यहं स्वाहान्तेनाहुतिं दत्वा
प्राणायामनिरोधतः निरस्तनिखिलोपाधिमात्मानं चिन्तयन्स्मरेत् प्राणायामं त्रयं कृत्वा ऋष्यादिन्यासमाच
रेत् कृत्वा षोडशन्यासं मंत्रमष्टोत्तरशतं जपित्वा देवतायैतदर्प्पयेद्दर्शैतोर्येतः पूजाचक्रं समस्तं वा वहिर्योगेन
तस्मरेत् पूजापीठं विनिर्माय पूजयेत्पीठदेवता गुरुपंक्तिं तदस्कुज्यां महागणपतिं स्ववाक् पूजयेदत्तलादी
नि देवस्यौधस्तु समर्चे मण्डूकं स्थापितं सोर्द्धरुद्रकालानलस्ततः मूलप्रकृतिमाधारशक्तिं कूर्ममनन्तकं वा
राहं तस्य दंष्ट्राग्रे पृथिवीं विमर्श्ययेत्पुनः तस्यास्तु यापैवं तस्मिन्द्वीपं च वरत्नजं स्वर्णं शैलं च तन्मध्ये मण्डूं हेमं दसे

र्गि नं रत्न

त्तम तन्मध्ये कल्पवृक्षाग्र तन्मध्ये रत्नभूमिकं स्वर्णप्राकारसंस्थानं तन्मध्ये रत्नमण्डपं तस्यान्तः स्वर्णवेदी वरत्न
सिंहासनं पुनः वेदीमध्ये भावयित्वा पूजयेद्वंदनादिना पूर्णां चक्राधारपीठसिंहासनमिति स्मृत तत्पादेषु प्रजे
त्समध्यकन्याग्नेयादिशि वान्तकं धर्मं वृषवत् नैर्ऋत्यां ज्ञानं कृष्णसिंहवत् वैराग्यं भूतवत्यां तेषैश्वर्यं कृष्णहस्ति
वत् अधर्मादीश्चित्रवर्णान् पीठस्याधः समर्च्चयेत् मायाविद्ये च तन्मध्ये नन्तं ... कृतिं यजेत् तस्य मूर्द्धि
जपेत्पद्मं अष्टप्रकृतिपत्रकं आनंदकन्दकं संविन्नालं विकारकेशरं कर्णिकां मातृकारूपां तत्पत्रेषु क्रमा
च्चयेत् सिद्धीरष्टौ क्रमात्प्रोक्तास्त्वणिमा च प्रकामता लघिमेशित्वमहिमावशित्वप्राप्तिगौरवे केशरेषु तथा
मध्ये पूर्वादिषु यथाक्रमे तर्च्चितंत्रोक्तपीठस्य नवशक्तिः प्रपूजयेत् पीठमंत्रेण गंधाद्यैः पीठमध्ये ततो
र्च्चयेत् चतुष्पीठनवसायुक्तैः स्वस्वदैवतनामभिः मध्ये पुष्पाञ्जलिं दद्यात्पीठमंत्रेण साधकः मूलमंत्रसमुच्चा
र्य्य षष्ठ्यान्ते पीठनाम च मूर्तिं च कल्पयामीति मूर्तिं मध्ये विनिःक्षिपेत् पुनर्मूलं समुच्चार्य्य देवतानाम ततः परं मू
र्तिं च पूजयामीति तत्पुष्पेण समर्च्चयेत् अथेष्टदेवतापीठे यजेदायतनान्यपि ईशे जेनेशजं शिवा हराविश
शजे नमः रवावीशशजे भौमादेव्याविशिगभास्कराः गणेशजेशमादेव्यामभ्यर्च्या ईशादिकोणतः एक
पीठे एवं पूजां विनायः करोति नरः देवताशापमाप्नोति रौरवं नरकं व्रजेत् तेनैव पूजयेद्यत्नं स देवशापमाप्नुयात्

मे॰
तं॰
६०

आवाह्य देवतामेकां मंत्रयेद्वान्यदेवतां । अन्ययंत्रेन्यपूजा वा देवताशापकारिणी ॥ पूजनं वह्निमूर्त्तीनामेकपीठे भवेद्यदि ॥ पृ
थक् चेद् दत्तपुष्पाणि धूपदीपादिकं व्रतः । खंडिते स्फुटिते दग्धे भ्रष्टे मानविवर्जिते ॥ यागेन रहपशस्पृष्टे पतिते दुष्टभूमिषु
अन्यतंत्रार्चिते चैव पतितस्पर्शदूषिते । दशस्वेतेषु नो कुर्युः सन्निधानं दिवौकसः ॥ गणेशसूर्यविष्णवीशदेवीनां
पूजने क्रमात् । दशस्थानानि देवानां पूजार्थं कल्पितानि च ॥ सान्निध्यं सर्वदेवानामवश्यं तत्र तो भवेत् । मंत्रस्तु जीव
तत्प्रोक्तः प्रतिमायं शरीरवत् ॥ सिद्धायामपि सामग्र्यां विना मंत्रं फलेन हि । शिवलिंगे मणौ यंत्रे शालग्रामे घटे
रवौ स्थण्डिले ग्रोमूर्त्तौ हृदि स्थानेष्वेतेषु पूजयेत् ॥ भूमौ चैव कृता पूजा पुत्रायुर्धननाशिनी । दशांगुलप्रमा
णो वा अधश्चा प्रतिमाविस्तरो गृहेषु गृहमेधिभिः । पंचसूत्रसमायुक्तं शिवलिंगं समर्चयेत् ॥ गृहस्थानां भुक्ति
मुक्तिधनारोग्यप्रदं नृणां तत् । लिंगमस्तकविस्तारो यावन्मात्रस्तु दीर्घता ॥ लिंगस्य लिंगशालकाजलहार्यास्त
थैव च । लिंगपीठस्य पंचानां समता पंचसूत्रिका ॥ शालग्रामसमं तस्मिन्निष्टं वत् परमाद्भुतं । गणेशकाशाक्रम
स्तं भवेत्तम मदेवताः । सर्वपुत्राः सुखदातृ जननानामितितेस्तुताः ॥ तस्यास्तु तपसा हृष्टा ब्रह्मविष्णुमहेश्वराः । व
रदातेस्तमयमज्ञाववेस्सा स्वस्य पुत्रतां । अशक्तास्त्वं वरं दातुं तदा सैमातृयोक्रुधा ॥ प्रेतारणं मम सुराः कृतेन यस्मा
त्पुनः पुनः । कीटयोनीप्रपद्यथाः कृत्वास्तु यस पुत्रता । अविचार्य्य वयं यस्मात्त्वया यत्नपेसोद्गते तनकर्म

६०

विपाकेन जडाह्यस्मान्नदी भव अन्योन्यशापं श्रुत्वैवं महान् कोलाहलोऽभवत् प्रकम्पिताः सुराः सर्वे ब्रह्माणं ते न्यवेदयन् ब्र
ह्मन्नाहि महाशापाद्देवान्मा पतितान् कुरु था इति देववचः श्रुत्वा ब्रह्मा शंकरमब्रवीत् शिवः प्रोवाच यो नाम महत्संहारका
रकः त्वं सृष्टिकर्ता विष्णुस्तु पालको बुद्धिमत्तरः स प्रष्टव्यो यथा सौख्यमुभयोः संभवेदिति इति माहेश्वरं श्रुत्वा वच
नं विष्णुरब्रवीत् शृणु ब्रह्मन् महादेव शृणु देवी गजानन मदंशेन ब्रह्मणो ग्राहमातंगो शापतो ऽत्र भविष्यतस्त
योर्मोक्षं करिष्यामि कलेवरे श्रीशैले भविष्यति यदा तस्य देहो मज्जसंभवाः पाषाणान्तर्गताः कीटा वज्रास्याः प्रभ
विष्यथ अथैव गण्डकी पुण्या गंगा तुल्या महानदी गण्डक्या गिरिराजस्य दक्षिणे दशयोजने विस्तीर्णे तन्मत्र
देवे पुण्ये देशे महीतले चक्रतीर्थमिति ख्यातं त्रिषु लोकेषु विश्रुतं शालग्रामगता देवा देवी द्वारावतीगताः
उभयोः संगमो यत्र मुक्तिस्तत्र न संशयः सर्वदेवप्रीतिदा भुक्तिमुक्तिप्रदायिनी भवतः स्यात् पाषाणाये न तदन्तर्ग
ताः सुराः पार्थिवांशं विना सर्वे वज्रकीटा भवन्त्विति अनेनैव तु गण्डक्याः पुत्रत्वं भवतामपि भविष्यति तदन्तश्च
विकृतदेवतोऽद्भवं वित्तायये ... पिष्यन्ति साप्रीतास्तस्य देवता न यं वस्तु न मूर्तेश्च न हृदा स्यापि शुजनात् संतोषो
जायते तेषां गण्डक्या मातृवनाद्यथा इति विष्णुवचः श्रुत्वा ब्रह्मा वचनमब्रवीत् त्वदीयवक्षसि शिलाप्रसूज्या ब्राह्मणा
द्यैः सुघोषमये स्निग्धा शिला मंत्रसिद्धिप्रदा सिद्धिं करोति च मेचका कीर्तिदा धौतागारवत्तायणो हरा पाण्डुरा पा

मे०
तं०
दी

61

पशमनीमलिनापापथीकरा पीतापुत्रफलंदद्याद्वरवर्णामनोहरा नीलासंदिशतेलक्ष्मीश्यामाभाद्दरतेमतिं रो
गप्रदारक्तवर्णासिंदूराभामहाकलिं दारिद्र्यकारिणीवक्रासमासर्वार्थसाधिका स्थूलानिर्हंतिचैवायुः सूक्ष्मास्वल्प
मतिंहरेत् पूजाफलंलांछितयानिष्फलंलांछनेविना कपिलाविर्मवैकल्पनेद्वेरोगंचकर्बुरा भग्नाभंगकच्छिद्रे
यावक्रचक्रंप्रमानंतां. बृहद्गर्भस्त्वीकलत्रघ्नीहनुचक्रास्तानहरेत् संलग्नचक्रातुसुखंवबद्धवक्रामहागदं भग्नच
क्रात्त्वदारिद्र्यंसर्वनाशंत्वधोमुखी ऊर्ध्वादिकंवामुखीविषमाविविधापदं विकृतावर्णनाभिन्नविकारान्कु
रुतेवक्रत्न् वंशक्षेत्रेगृहस्थानांनारसिंहोप्रजायते रेखाबिंदुःखदाऽग्नीयथा सूक्ष्मातथा सर्वं यथास्थितस्थाल
याललक्ष्मीस्तद्विभेदाननतः शृणु लक्ष्मीहरिः सविज्ञेयोयत्रपद्मंसचक्रकं केवलावनमालावागृहस्थानामभीष्ट
दः वासुदेवसविज्ञेयोयद्वारेचक्रयुग्मकं निरंतरसमंचापिसम्येतः पापनाशनः संकर्षणःसविज्ञेयः प्राक्प्रा
ग्चक्रयुग्मकंसलग्नपूर्वभागस्थंमहद्धनाः सुशोभनः प्रद्युम्नःसूक्ष्मचः स्याच्छिद्रदीर्घविचित्रितं सुखिरान्तवक्र
छिद्रंपीतदृष्टप्रदायकं अनिरुद्धस्तुनीलाभोवर्तुलश्चातिशोभनः रेखाद्वयंतुतद्वारिपृष्टंपद्मेनलांछितं केश
वःसतुविज्ञेयः पकेवाद्वयमेववा याम्यापश्चाचक्रंस्याद्वतः कोणसमायुक्तं नारायनःस्यामवर्णाभोचक्रत
याच्चितं दीर्घरेखासमायुक्तंघजिनेशुखिरंस्मृतं हयरूपाशिलासास्याद्यस्यांदेमुखंभवेत् हरिवद्दशणेनेह्यारामु

क्तिमुक्तिप्रदश्चासौ परमेष्ठी स विज्ञेयः पद्मचक्रान्वितस्तथा विल्वाकृतिश्च मुक्ताभः पृष्ठे च सुषिरं महत् विष्णुस्तु कृष्णव
र्णः स्यात्स्थूले चक्रसुशोभने हारोपरि तथा रेखा दृश्यते मध्यदेशतः नरसिंहस्तु कपिलः पृथुचक्रो बृहन्मुखः त्रयो
वा पंच वा त्रिबिन्दवो हि नेनिसन्तत् कपिलो नरसिंहस्तु गुण्डलादानिभो भवेत् स्थूलचक्रद्वयं मध्ये हारे रेखा सुशोभना म
हानरसिंहो विज्ञेयः पृष्ठे नीलत्वलक्षणेयुतः लेखा च केशराकारा मुखं दीर्घं भयानकं लक्ष्मीनरसिंहो विज्ञेयः श्यामस्थ
कः स विन्दुकः पृष्ठे नीलत्वलक्षणो वनमालाविराजितः वराहो सौ शक्तिलिंगे च के च विषमे तथा इंद्रनीलनिभः
स्थूलस्त्रिलेखालांछितो भवेत् पृथ्वीवाराहनाम्नी सा यो वराहाकृतिः शिला श्यामतम्रीचैवरे रेखाका गतराज्यप्रदा
यिका मत्स्याख्यो सा शिला ज्ञेया विन्दुत्रयेण विभूषिता कांस्याङ्गा वा स्वर्णनिभा दीर्घा सा भुक्तिमुक्तिदा कूर्माख्या व
शिला पृष्ठे वर्तुला वा नता भवेत् हरितं वर्णमाधत्ते कौस्तुभेन विचिह्निता शिला कूर्मकासविज्ञेयः कूर्माकारस्तु यो
भवेत् चक्राङ्किता तथा पुत्रमा पूजिता साभ्युदप्रभा हयग्रीवाकुशाकारा रेखाचक्रासमीपगा बहुबिन्दुसमायुक्ते
पृष्ठे नीलदलके ज्ञेयः सम्पद्धयग्रीवो हयग्रीवा समा शिला दीर्घया रेखया युक्तो रेखा वा नादशि भवेत् हयशी
र्षः स विज्ञेया म्लेच्छयपस्तु हयाकृति पद्माकृति भवेद्वापि सा तु माले शिला तथा वैकुण्ठकपिलवर्णा भवेच्चक्रे मे
कन्तया ध्वज हारोपरि तथा रेखा पङ्कजकारा सुशोभना श्रीधरस्तु तथा देवश्चिह्नितो वनमालया कदम्बकुसुमा

मे॰
तं
६२

62

कारोरेखापंचकभूषिता वामनः सतुविज्ञेयो योतिकूस्वश्च वर्तरः अतसीकुसुमप्रख्यो विंदुनोपरिशोभितः दधि
वामननामा तु ऊर्द्धाधश्चक्रसंयुतः महाद्युतिरतिकूस्वः सुभिक्षेत्तमदायकः सुदर्शनस्तथा देवः श्यामवर्ण्णो
महाद्युतिः वामपार्श्वे तथा चक्रं रेखैकैव तु दक्षिणा सहस्रार्जुननामासौ नानारेखामयो भवेत् चक्राकरायतपं
क्तिः सनष्टद्रव्यदायकः स्थूलो दामोदरो यस्य मध्ये चक्रं प्रतिष्ठितं दूर्वाभं द्वारिसंकीर्ण्णः पीतरेखोथनप्रदः
राधा दामोदरो ज्ञेयः ऊर्द्धाधश्चक्रमान् विरं नातिदीर्घमुखं मध्ये लंबारेखा सभोगदः दामोदरः स विज्ञेयो यश्चक
हृयलांछितः सत्कमवक्त्रविवलश्च जितः सुखदः सदा अनंतो वज्र वर्म्मः स्यान्नानाभोगेन चिन्हितः अनेकचक्रसं
भिन्नः सर्वकामफलप्रदः पुरुषोत्तमनामासौ यस्य दृष्टिविदिक्वच ऊर्द्धो न्यासस्यानिदर्शणते पुरुषार्थफलप्रदः योगे
श्वरः स विज्ञेयो लिंगयस्य शिरोगतं ब्रह्महत्यादिपापानां नाशको योगसिद्धिदः पद्मनाभस्तथा रक्तपंकजछत्रसं
युतः तुलस्याश्च जितो नित्यं दरिद्रात्कीश्वरो भवेत् रश्मिमत्ता लोहिरण्यस्य चंद्राभः स्फतिकोपमः अथवा जायते ना
नास्वर्ण्णरेखाभिरन्वितः गरुडः स तु विज्ञेया मध्ये पदे द्वयान्विते सुदीर्घा दर्शने रेखा स सर्पविषनाशकः जनार्दनः
